## सुन्दरकाण्ड एकपञ्चाशः सर्गः (५१) - ॥ हनूमदुपदेशः ॥

तं समीक्ष्य महासत्त्वं सत्त्ववान् हरिसत्तमः ।
वाक्य मर्थवद व्यग्रस् तमुवाच दशाननम् ॥ १ ॥

अहं सुग्रीव सन्देशा दिह प्राप्तस् तवालयम् ।
राक्षसेन्द्र हरीशस् त्वां भ्राता कुशल मब्रवीत् ॥ २ ॥

भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः ।
धर्मार्थोप हितं वाक्य मिह चामुत्र च क्षमम् ॥ ३ ॥

राजा दशरथो नाम रथ कुञ्जर वाजिमान् ।
पितेव बन्धुर् लोकस्य सुरेश्वर समद्युतिः ॥ ४ ॥

ज्येष्ठस् तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः ।
पितुर् निदेशान् निष्क्रान्तः प्रविष्टो दण्डकावनम् ॥ ५ ॥

लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया ।
रामो नाम महातेजा धर्म्यं पन्थान माश्रितः ॥ ६ ॥

तस्य भार्या वने नष्टा सीता पति मनुव्रता ।
वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥ ७ ॥

स मार्गमाणस् तां देवीं राजपुत्रः सहानुजः ।
ऋश्यमूक मनुप्राप्तः सुग्रीवेण समागतः ॥ ८ ॥

तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् ।
सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ॥ ९ ॥

ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् ।
सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः ॥ १० ॥

त्वया विज्ञात पूर्वश्च वाली वानर पुङ्गवः ।
रामेण निहतः सङ्ख्ये शरेणैकेन वानरः ॥ ११ ॥

स सीता मार्गणे व्यग्रः सुग्रीवः सत्य सङ्गरः ।
हरीन् सम्प्रेषयामास दिशः सर्वा हरीश्वरः ॥ १२ ॥

तां हरीणां सहस्राणि शतानि नियुतानि च ।
दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चाम्बरे ॥ १३ ॥

वैनतेय समाः केचित् केचित् तत्रा निलोपमाः ।
असङ्ग गतयः शीघ्रा हरिवीरा महाबलाः ॥ १४ ॥

अहं तु हनुमान् नाम मारुतस् यौरसः सुतः ।
सीतायास्तु कृते तूर्णं शतयोजन मायतम् ॥ १५ ॥

समुद्रं लङ्घयित्वैव तां दिदृक्षु रिहागतः ।
भ्रमता च मया दृष्टा गृहे ते जनकात्मजा ॥ १६ ॥

तद् भवान् दृष्ट धर्मार्थस् तपः कृत परिग्रहः ।
परदारान् महाप्राज्ञ नोपरोद्धुं त्वमर्हसि ॥ १७ ॥

न हि धर्म विरुद्धेषु बह्वपायेषु कर्मसु ।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १८ ॥

कश्च लक्ष्मण मुक्तानां राम कोपानु वर्तिनाम् ।
शराणा मग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ १९ ॥

न चापि त्रिषु लोकेषु राजन् विद्येत कश्चन ।
राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥ २० ॥

तत् त्रिकाल हितं वाक्यं धर्म्य मर्थानु बन्धि च ।
मन्यस्व नरदेवाय जानकी प्रति दीयताम् ॥ २१ ॥

दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभम् ।
उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २२ ॥

लक्षितेयं मया सीता तथा शोक परायणा ।
गृह्य यां नाभिजानासि पञ्चास्या मिव पन्नगीम् ॥ २३ ॥

नेयं जरयितुं शक्या सासुरै रमरैरपि ।
विष संसृष्ट मत्यर्थं भुक्तमन्न मिवौजसा ॥ २४ ॥

तपःसन्ताप लब्धस्ते योऽयं धर्म परिग्रहः ।
न स नाशयितुं न्याय्य आत्म प्राण परिग्रहः ॥ २५ ॥

अवध्यतां तपोभिर्यां भवान् समनु पश्यति ।
आत्मनः सासुरैर् देवैर् हेतुस् तत्राप्ययं महान् ॥ २६ ॥

सुग्रीवो न हि देवोऽयं नासुरो न च राक्षसः ।
न दानवो न गन्धर्वो न यक्षो न च पन्नगः ॥ २७ ॥

तस्मात् प्राण परित्राणं कथं राजन् करिष्यसि ।
न तु धर्मोप संहार मधर्म फल संहितम् ॥ २८ ॥

तदेव फलमन्वेति धर्मश् चाधर्म नाशनः ।
प्राप्तं धर्मफलं तावद् भवता नात्र संशयः ॥ २९ ॥

फल मस्याप्य धर्मस्य क्षिप्रमेव प्रपत्स्यसे ।
जनस्थान वधं बुद्ध्वा बुद्ध्वा वालि वधं तथा ॥ ३० ॥

राम सुग्रीव सख्यं च बुध्यस्व हित मात्मनः ।
कामं खल्वह मप्येकः सवाजि रथ कुञ्जराम् ॥ ३१ ॥

लङ्कां नाशयितुं शक्तस् तस्यैष तु न निश्चयः ।
रामेण हि प्रतिज्ञातं हर्यृक्ष गण सन्निधौ ॥ ३२ ॥

उत्सादन ममित्राणां सीता यैस्तु प्रधर्षिता ।
अपकुर्वन्हि रामस्य साक्षादपि पुरन्दरः ॥ ३३ ॥

न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ।
यां सीतेत्यभि जानासि येयं तिष्ठति ते वशे ॥ ३४ ॥

कालरात्रीति तां विद्धि सर्व लङ्का विनाशिनीम् ।
तदलं काल पाशेन सीता विग्रह रूपिणा ॥ ३५ ॥

स्वयं स्कन्धाव सक्तेन क्षममात्मनि चिन्त्यताम् ।
सीतायास् तेजसा दग्धां राम कोप प्रपीडिताम् ॥ ३६ ॥

दह्यमाना मिमां पश्य पुरीं साट्ट प्रतोलिकाम् ।
स्वानि मित्राणि मन्त्रींश्च ज्ञातीन् भ्रातॄन् सुतान्हितान् ॥ ३७ ॥

भोगान् दारांश्च लङ्कां च मा विनाश मुपानय ।
सत्यं राक्षस राजेन्द्र शृणुष्व वचनं मम ॥ ३८ ॥

रामदासस्य दूतस्य वानरस्य विशेषतः ।
सर्वाँल्लोकान् सु संहृत्य सभूतान् स चराचरान् ॥ ३९ ॥

पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ।
देवासुर नरेन्द्रेषु यक्ष रक्षो गणेषु च ॥ ४० ॥

विद्याधरेषु सर्वेषु गन्धर्वेषू रगेषु च ।
सिद्धेषु किन्नरेन्द्रेषु पतत्रिषु च सर्वतः ॥ ४१ ॥

सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः ।
यो रामं प्रति युध्येत विष्णु तुल्य पराक्रमम् ॥ ४२ ॥

सर्वलोकेश्वरस् यैवं कृत्वा विप्रिय मीदृशम् ।
रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ॥ ४३ ॥

देवाश्च दैत्याश्च निशाचरेन्द्र
गन्धर्व विद्याधर नागयक्षाः ।
रामस्य लोकत्रय नायकस्य
स्थातुं न शक्ताः समरेषु सर्वे ॥ ४४ ॥

ब्रह्मा स्वयम्भूश् चतुराननो वा
रुद्रस् त्रिनेत्रस् त्रिपुरान्तको वा ।
इन्द्रो महेन्द्रः सुरनायको वा
त्रातुं न शक्ता युधि रामवध्यम् ॥ ४५ ॥

स सौष्ठ वोपेत मदीन वादिनः
कपेर् निशम्या प्रतिमोऽप्रियं वचः ।
दशाननः कोप विवृत्त लोचनः
समादिशत् तस्य वधं महाकपेः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥